श्रीः ।

शिवहरराजधानीपति-

श्रीराजादेवनन्दनसिंहबहादूरनराधिप-

संगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

चतुर्थं

भुवनेश्वरीतन्त्रम् ।

उक्तराजगुरुवंश्यपण्डितश्रीरघुराज-

दुबेजीद्वारा संशोधितम् ।

तदेतत्

खेमराज श्रीकृष्णदासश्रेष्ठिना

मुम्बय्यां

स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रागारे

मुद्रयित्वा प्रकाशितम् ।

तृतीयावृत्तिः ।

अस्य ग्रन्थस्य पुनर्मुद्रणाधिकारः १८६७ वार्षिक २५ तमराज

नियमानुरोधेन प्रकाशकाधीनाः सन्ति ।

भुवनेश्वरीतन्त्रम्

अथ भुवनेश्वरीध्यानम्

॥ श्रीगणेशाय नमः ॥

शाक्तप्रमोदः ।

भुवनेश्वरीतन्त्रम् ।


अथ भुवनेश्वरीध्यानम् ।

उद्यदिनद्युतिमिन्दुकिरीटान्तुङ्गकुचान्नयनत्रययुक्ताम् ॥
स्मेरमुखीँवरदाङ्कुशपाशाभीतिकराम्प्रभजेभुवनेशीम् ॥



अथ यन्त्रोद्धारः ॥

पद्ममष्टदलम्बाह्येवृत्तंषोडशभिर्दलैः ॥ विलिखेत्कर्णिकामध्ये षट्कोणमतिसुन्दरम् ॥ चतुरस्रञ्चतुर्द्वारमेवम्मण्डलमालिखेत् ॥



अथ मन्त्रोद्धारः ।

नकुलीशोग्निमारूढोवामनेत्रार्द्धचन्द्रवत् ॥ बीजन्तस्याःस माख्यातंसेवितंसिद्धिकाङ्क्षिभिः ॥

अथ मन्त्रः "ह्रीँ"

अथ पूजाप्रयोगः ।

प्रातःकृत्यादिपीठन्यासान्तङ्कर्म्मविधायकेसरेषुमध्येच पीठ शक्तीर्न्यसेत् । ॐजयायैनमः एवँव्विजयायैनमः अजितायै०अ पराजितायै०नित्यायै०विलासिन्यै०दोग्ध्र्यै०अघोरायै०मङ्गला यै०कर्णिकायांह्रीँसर्व्वशक्तिकमलासनायनमः । ततःऋष्या दिन्यासः ।अस्यभुवनेश्वरीमन्त्रस्यशक्तिर्ऋषिर्ग्गायत्रीछन्दोभुव नेश्वरीदेवताहकारोबीजम् ईकारःशक्तिःरेफः२कीलकंचतुर्व्वर्ग सिद्धचर्त्थेविनियोगः।शिरसिशक्तयेऋषयेनमः। मुखेगायत्रीछन्द सेनमः। हृदिभुवनेश्वर्य्यै देवतायैनमः। गुह्ये हकाराय बीजाय नमः । पादयोःईकारायशक्तयेनमः । सर्व्वाङ्गेरकारायकीलका यनमः । ततोन्यासः । शिरसिॐहृल्लेखायैनमः वदनेएँगगनायै नमः हृदयेऊँरक्तायैनमः गुह्येइँकरालिकायैनमः पादयोः ॐम

होच्छुष्मायैनमःऊर्द्ध्वप्राग्दक्षिणोदीच्यपश्चिमेषु मुखेषु ता वि न्यसेत्। हृल्लेखाम्मूर्द्ध्निवदनेगगनांहृदयाम्बुजे ॥ रक्ताङ्करालि काङ्कह्ये महोच्छुष्माम्पदद्वये॥ सत्यादिपञ्चह्रस्वाढचान्यस्तव्या भूतसप्रभाः ॥ ततऽकराङ्गन्यासौ ॥. ह्रांअङ्गुष्ठाभ्यान्नमः ह्रींत र्ज्जनीभ्यांस्वा० ह्रूंमध्यमाभ्यांवषट् ह्रैंअनामिकाभ्यांहूम् ह्रौं कनिष्ठिकाभ्याँव्वौषट् ह्रःकरतलकरपृष्ठाभ्याम्फट् एवँहृदयादि षु ॥ षड्दीर्घभाजाबीजनकुर्य्यादङ्गक्रियाम्मनोः। स्वच्छन्दस ङ्ग्रहे॥स्वरँव्विहायबीजन्तुदीर्घषट्केनयोजयेत्। षडङ्गानिविधेयानि सर्व्वत्रायँव्विधिःस्मृतः ॥ अङ्गुलीनियमस्तु पूर्व्व एवोक्तः । क राङ्गन्यासे एवङ्क्रमः। ततःभाले ॐगायत्रीसहितब्रह्मणेनमः। दक्षिणकपोले ॐसावित्रीसहितविष्णवेनमः। वामकपोले ॐवा गीश्वरीसहितमहेश्वरायनमः। वामकर्ण्णे ॐश्रीसहितधनपतयेन मः। मुखे ॐरतिसहितस्मरायनमः। दक्षिणकर्ण्णोपरि ॐपुष्टिस हितगणपतयेनमः। इतिन्यसेत् । एवङ्कण्ठमूले दक्षस्तनवामां सहृदयदक्षिणांसदक्षिणपार्श्ववामपार्श्वनाभिदेशेषुब्राह्म्यादि न्यसेत्॥वर्ण्णाभिन्नन्यासोविश्वसारे। ॐकारादिनमोन्तञ्चविन्य सेत्तुयथास्थिति ॥ विधिनाविन्यसेत्सर्व्वंशङ्करस्यमतेनच ॥ ए वंसर्व्वत्र ॥ ततोललाटे ॐब्राह्म्यैनमः । वामांसे ॐमाहे श्वर्य्यैनमः। वामपार्श्वेॐकौमार्य्यैनमः । जठरे ॐवैष्णव्यैन मः।दक्षिणपार्श्वेॐवाराह्यैनमः । दक्षिणांसेॐइन्द्राण्यैनमः। ककुदिॐचामुण्डायैनमः।हृदिॐमहालक्ष्म्यैनमः । इतिविन्य स्य मूलेनव्यापकत्रयङ्कुर्य्यात्॥ ततोध्यानम्॥"उद्यदिनद्युतिमि न्दुकिरीटान्तुङ्गकुचान्नयनत्रययुक्ताम् ॥ स्मेरमुखींव्वरदाङ्कुशपा शाभीतिकराम्प्रभजेभुवनेशीम्॥१॥"एवन्ध्यात्वा मानसैः सम्पू ज्यवहिऽपूजामारभेत्॥पूजायन्त्रम्॥पद्ममष्टदलम्वाह्येवृत्तंषोडश

भिर्दलैः॥विलिखेत्कर्णिकामध्येषट्कोणमतिसुन्दरम् ॥ चतुरस्र श्चतुर्द्वारमेवम्मण्डलमालिखेत् ॥ ततोदीक्षापद्धत्युक्तपीठपूजाङ्कृत्वा पीठशक्तीश्पूजयेत् । तद्यथा । पूर्वादिकेसरेषु जयायै० विजयायै०अजितायै०अपराजितायै०नित्यायै० विलासिन्यै० दोग्ध्यै० अघोरायै० मध्येमङ्गलायै० प्रणवादिनमोन्तेनपूजयेत् । तदुपरिह्रीं सर्वशक्तिकमलासनायनमः ॥ निबन्धे ॥ ततस्सम्पूजयेत्पीठन्नानाशक्तिसमन्वितम् ॥ जयाख्यांविजयांपश्चादजिताचापराजिताम् ॥ नित्याँव्विलासिनीन्दोग्ध्रीमघोराम्मङ्गलामपि ॥ वीजाद्यमासनन्दत्वामूर्त्तिन्तत्रैवकल्पयेत् ॥ ततः पूर्ववद्धत्वाऽऽवाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तँव्विधाय । केसरेषु ऐशान्यादिकोणे मध्ये दिक्षुच । ततोह्रींहृदयायनम इत्यादिनापडङ्गेनपूजयित्वापञ्चपुष्पाञ्जलीन्दद्यात् ॥ तत आवरणपूजा ।कर्णिकामध्येॐहृल्लेखायैनमः । पूर्व्वे ऐंगगनायै०। दक्षिणे ऊंरक्तायै० । उत्तरे ईंकरालिकायै० । पश्चिमे हूँमहोच्छुष्मायै० । षट्कोणे पूर्वे ॐगायत्र्यैनमः ॐब्रह्मणेनमः । नैर्ऋत्ये ॐसावित्र्यैनमःॐविष्णवेनमः ॥ वायव्येॐसरस्वत्यैनमः ॐरुद्रायनमः। वह्निकोणे ॐश्रियनमः ॐधनपतयेनमः। पश्चिमे ॐरत्यैनमः ॐस्मरायनमः । ऐशान्याम् ॐपुष्टयैनमः ॐगणपतयेनमः । षट्कोणस्योभयपार्श्वयोः ॐशङ्खनिधयेनमः ॐपद्मनिधयेनमः ॥ केसरेषुअग्निनैर्ऋतिवाय्वीशानाग्रेषुचतुर्दिक्षुचह्राँहृदयायनमइत्यादिनापडङ्गेनपूजयेत्। तथाचनिबन्धे। केसरेष्वग्निकोणादिहृदयादीनिपूजयेत्॥नेत्रमग्निदिशाद्यन्तन्ध्यातव्याश्चाङ्गदेवताः॥ एवंसर्वत्र ॥ भैरव्यादौतुविशेषोवक्तव्यः ।अष्टदलेषुपूर्वादिक्रमेण । ॐअनङ्गकुसुमायैनमः एवमनङ्गकुसुमातुरायैनमः अनङ्गमदनायै ० अनङ्गमदनातुरायै०भुवनपालायै०

गगनवेगायै ० शशिरेखायै ० ॥ षोडशदलेषुपूर्व्वादिदिक्षु ॐकरालिन्यै ० एवं विकरालिन्यै ० उमायै० सरस्वत्यै ० श्रियै० दुर्ग्गायै ० उषायै ० लक्ष्म्यै० श्रुत्यै० स्मृत्यै० धृत्यै० श्रद्धायै० मेधायै ० मत्यै० कान्त्यै० आर्य्यायै० । पद्माद्बहिः पूर्व्वादिदिक्षु अनङ्गरूपायै० अनङ्गमदनायै० मदनातुरायै० भुवनवेगायै० भुवनपालिकायै० सर्व्वशिशिरायै० अनङ्गवेदनायै० अनङ्गमेखलायै० प्रणवादिनमोन्तेनपूजयेत् तद्बहिर्गृहेपूर्व्वादिॐलांइन्द्रायदेवाधिपतयेसायुधायेत्यादि० रंअग्नयेतेजोधिपतयेसायुधायेत्यादि० यंयमायप्रेताधिपतयेसायुधायेत्यादि ० क्षांनिर्ऋतयेरक्षोधिपतयेसायुधायेत्यादि० वंवरुणायजलाधिपतयेसायुधायेत्यादि० वां वायवेप्राणाधिपतयेसायुधायेत्यादि० संसोमायताराधिपतयेसायुधायेत्यादि० ह्रांईशानायगणाधिपतयेसायुधायेत्यादि० इन्द्रेशानयोर्म्मध्ये ॐब्रह्मणेप्रजाधिपतयेसायु० निर्ऋतिवरुणयोर्म्मध्ये ह्रींअनन्तायनागाधिपतयेसायु० । तथाच । लोकपालाबहिः पूज्याःसमस्ताश्चतुरस्रके ॥ पुरुहूतेशयोर्म्मध्ये रक्षोवरुणयोस्तथा ॥ ब्रह्मविष्णूसदापूज्यौ दिगीशार्च्चाँव्विदुर्ब्बुधाः ॥ इन्द्रादिलोकपालानाय्येमन्त्रास्तेध्रुवादिकाः ॥ स्वस्ववीजान्विताःसर्व्वेचतुर्थ्यन्तनमोन्तकाः इति वचनात् । सर्व्वत्रप्रणवादि । एतेषाम्वीजान्याहुः क्रियासारे । पृथ्व्यग्निपवनाद्यन्तवरुणानिलसेश्वरैः ॥ अनन्तविन्दुसँयुक्तैरर्क्ष्यांपाशेनमायया ॥ तथाचयामले । अन्तेयज्ञेलोकपालान्मूलपारिदधान्वितान् ॥ हेतिजात्यधिपोपेतान् दिक्षुपूर्व्वादितोयजेत् ॥ सवाहनायतिर्दीपिका ।तद्बहिः पूर्व्वादि वज्राय शक्तये दण्डाय खड्गाय पाशाय अङ्कुशाय गदायै शूलाय पद्माय चक्रायप्रणवादिनमोऽन्तेनपूजयेत्। ततोधूपादिविसर्জ্জनान्तकर्म्मसमापयेत् । अस्यपुरश्चरणन्द्वा

त्रिंशल्लक्षजपम्प्रजपेत् मन्त्रन्द्वात्रिंशल्लक्षमानसः ॥ त्रिस्वादुयुक्तै र्जुहुयादष्टद्रव्यैर्दशांशतः ॥ अष्टद्रव्याणियथा । अश्वत्थोदु म्बरप्लक्षन्यग्रोधसमिधस्तिलाः ॥ सिद्धार्त्थपायसाज्यानिद्रव्या ण्यष्टौविदुर्ब्बुधाः ॥ त्रिस्वाद्रितिघृतमधुशर्क्करेति ॥ इतिभुवने श्वरीपूजापद्धतिः ॥

अथ स्तोत्रम् ।

अथानन्दमयीं साक्षाच्छब्दब्रह्मस्वरूपिणीम् ॥ ईडे सकल सम्पत्त्यै जगत्कारणमम्बिकाम् ॥ १ ॥ विद्यामशेषजननीमर विन्दयोनेर्व्विष्णोः शिवस्यचवपुःप्रतिपादयित्रीम् ॥ सृष्टिस्थि तिक्षयकरीञ्जगतान्त्रयाणां स्तुत्वागिरँव्विमलयाम्यहमम्बिकेत्वा म् ॥ २ ॥ पृथ्व्याजलेनशिखिनामरुताम्बरेणहोत्रेन्दुनादिनक रेणचमूर्त्तिभाजः ॥ देवस्यमन्मथरिपोरपिशक्तिमत्ताहेतुस्त्वमेव खलुपर्वतराजपुत्रि ॥ ३ ॥ त्रिस्रोतसः सकलदेवसमर्च्चितायाः वै शिष्ट्यकारणमवैमितदेवमातः ॥ त्वत्पादपङ्कजपरागपवित्रि तासुशम्भोर्ज्जटासुसततम्परिवर्त्तनँय्यत् ॥ ४ ॥ आनन्दयेत्कुमु दिनीमधिपःकलानान्न्यामिनःकमलिनीमथनेतराँव्वा ॥ एकस्यमोदनविधौपरमेकमीष्टे त्वन्तुप्रपञ्चमभिनन्दयसिस्वदृ ष्टया ॥ ५ ॥ आद्याप्यशेषजगतान्नवयौवनासिशैलाधिराजतन याप्यतिकोमलासि ॥ त्रय्याःप्रसूरपितयानसमीक्षितासिध्येया सिगौरिमनसोनपथिस्थितासि ॥ ६ ॥ आसाद्यजन्ममनुजेषुचि राद्दुरापन्तत्रापिपाटवमवाप्यनिजेन्द्रियाणाम् ॥ नाभ्यर्च्चयन्तिज गताञ्जनयित्रियेत्वान्निश्रेणिकाग्रमधिरुह्यपुनःपतन्ति ॥ ७ ॥ क र्प्पूरचूर्णहिमवारिविलोडितेन येचन्दनेनकुसुमैश्चसुजातगन्धैः ॥ आराधयन्तिहिभवानिसमुत्सुकास्त्वान्तेखल्वखण्डभुवनाधि

भुवःप्रथन्ते ॥ ८ ॥ आविश्यमध्यपदवीम्प्रथमेसरोजेसुप्ताहिराज सदृशीविरचय्यविश्वम् ॥ विद्युल्लतावलयविभ्रमसुद्वहन्तीपद्मा निपञ्चविदलय्यसमश्नुवाना ॥ ९ ॥ तन्निर्गतामृतरसैरभिषि च्यगात्रम्मार्गेणतेनविलयम्पुनरप्यवाप्ता ॥ येषांहृदिस्फुरसिजा तुनतेभवेयुर्म्मातर्म्महेश्वरकुटुम्बिनिगर्भभाजः ॥१०॥ आलम्बि कुण्डलभरामभिरामवक्त्रामापीवरस्तनतटीन्तनुवृत्तमध्याम् ॥ चिन्ताक्षसूत्रकलशालिखिताब्यहस्तामावर्त्तयामिमनसातवगौरि मूर्तिम् ॥ ११ ॥ आस्थाययोगमविजित्यचवैरिषट्कमावध्यचे न्द्रियगणम्मनसिप्रसन्ने ॥ पाशाङ्कुशाभयवराब्यकरांशुवक्त्रामा लोकयन्तिभुवनेश्वरियोगिनस्त्वाम् ॥ १२ ॥ उत्तप्तहाटकनि भाङ्गरिभिश्चतुर्भिरावर्त्तितामृतघटैरभिषिच्यमाना ॥ हस्तद्व येननलिनेरुचिरेवहन्तीपद्मापिसाभयकराभवसित्वमेव ॥ १३ ॥ अष्टाभिरुग्रविविधायुधवाहिनीभिर्दोर्व्वल्लरीभिरधिरुह्यमृगाधिवा सम् ॥ दूर्व्वादलद्युतिरमत्यविपक्षपक्षान्व्यक्कुर्व्वतीत्वमसिदेविभ वानिदुर्गे ॥ १४ ॥ आविर्भिन्नदाघजलशीकरशोभिवक्त्राङ्कुशा फलेनपरिकल्पितहारयष्टिम् ॥ रत्नांशुकामसितकान्तिमलङ्कृता न्त्वामाद्याम्पुलिन्दतरुणीमसकृन्नमामि ॥ १५ ॥ हंसैर्गतिंकृक णितनूपुरदूरदृष्टेर्मूर्त्तेरिवात्मवचनैरनुगम्यमानौ ॥ पद्माविवोर्द्धमु खरूढसुजातनालौ श्रीकण्ठपत्निशिरसैवदधेतवाङ्घ्री ॥ १६ ॥ द्वाभ्यांसमीक्षितुमतृप्तिमतेवदृग्भ्यासुत्पाद्यतात्रिनयनन्वृषकेतने न ॥ सान्द्रानुरागभवनेननिरीक्ष्यमाणे जङ्घे उभेअपिभवानित वानतोऽस्मि ॥ १७ ॥ ऊरूस्मरामि जितहस्तिकरावलेपौ स्थौल्येनमार्द्दवतयापरिभूतरम्भौ ॥ श्रोणीभरस्यसहनौपरिक ल्प्यदत्तौ स्तम्भाविवाङ्गवयसातवमध्यमेन ॥ १८ ॥ श्रोण्यौस्त नौचयुगपत्प्रथयिष्यतोऽब्बाल्यात्परेणवयसापरिकृष्णसारः ॥

रोमावलीविलसितेनविभाव्यमूर्तिर्म्मध्यन्तवस्फुरतुमेहृदयस्य मध्ये ॥ १९ ॥ सख्यास्स्मरस्यहरनेत्रहुताशभीरोर्लावण्यवारिभरितन्नवयौवनेन ॥ आपाद्यदत्तमिवपल्लवमप्रविष्टन्नाभिङ्कदापितवदेविनविस्मरेयम् ॥ २० ॥ ईशोपिगेहपिशुनम्भसितन्दधाने काश्मीरकर्दममनुस्तनपङ्कजेते ॥ स्नानोत्थितस्यकरिणः क्षणलक्षफेनौ सिन्दूरितौस्मरयतः समदस्यकुम्भौ ॥ २१ ॥ कण्ठातिरिक्तगलदुज्ज्वलकान्तिधाराशोभौभुजौ निजरिपोर्म्मकरध्वजेन ॥ कण्ठग्रहायरचितौ किलदीर्घपाशौ मातर्म्ममस्मृतिपथन्नविलङ्घयेताम् ॥ २२ ॥ नात्यायतंरुचिरकम्बुविलासचौर्य्यं भूषाभरेणविविधेनविराजमानम्॥कण्ठम्मनोहरगुणाङ्गिरिराजकन्येसञ्चिन्त्यतृप्तिमुपयामिकदापिनाहम् ॥ २३॥ अत्यायताक्षमभिजातललाटपट्टम्मन्दस्मितेनदरफुल्लकपोलरेखम् ॥ बिम्बाधरंखलुसमुन्नतदीर्घनासय्यँत्तेस्मरत्यसकृदम्बसएवजातः ॥ २४ ॥ आविस्त्वयारकरलेखमनल्पगन्धपुष्पोपरिभ्रमदलिव्रजनिर्व्विशेषम् ॥ यश्चेतसाकलयतेतवकेशपाशन्तस्यस्वयङ्गलतिदेविपुराणपाशः ॥ २५ ॥ श्रुतिसुरचितपाकन्धीमतां स्तोत्रमेतत् पठतियइहमर्त्त्यो नित्यमार्द्रान्तरात्मा ॥ सभवतिपदमुच्चैस्सम्पदाम्पादनम्रक्षितिपमुकुटलक्ष्मीर्ल्लक्षणानाञ्चिराय ॥ २६ ॥ इतिभुवनेश्वरीस्तोत्रंसमाप्तम् ॥

अथ कवचम् ।

देव्युवाच ॥ भुवनेश्याश्चदेवेश यायाविद्याः प्रकाशिताः ॥ श्रुताश्चाधिगताः सर्व्वाः श्रोतुमिच्छामिसाम्प्रतम् ॥ १ ॥ त्रैलोक्यमङ्गलन्नामकवचँय्यत्पुरोदितम् ॥ ईश्वरउवाच ॥ शृणुपार्व्वतिवक्ष्यामिसावधानाऽवधारय ॥ २ ॥ त्रैलोक्यमङ्गलन्नामकव

चम्मन्त्रविग्रहम् ॥ सिद्धविद्यामयन्देविसर्व्वैश्वर्य्यप्रदायकम् ॥ ॥ ३ ॥ पठनाद्धारणान्मर्त्त्यस्त्रैलोक्यैश्वर्य्यभाग्भवेत् ॥ ४ ॥ त्रैलोक्यमङ्गलस्यास्यकवचस्यऋषिश्शिवः ॥ छन्दोविराड्जगद्धात्रीदेवताभुवनेश्वरी ॥ ५ ॥ धर्म्मार्थकाममोक्षेषुविनियोगः प्रकीर्तितः ॥ ह्रींबीजम्मेशिरःपातुभुवनेशीललाटकम् ॥ ६ ॥ ऐं पातुदक्षनेत्रम्मेह्रींपातुवामलोचनम् ॥ श्रींपातुदक्षकर्ण्णम्मेत्रिवर्ण्णात्मामहेश्वरी ॥ ७ ॥ वामकर्ण्णंसदापातुऐंघ्राणम्पातुमेसदा॥ ह्रींपातुवदनन्देवीऐंपातुरसनाम्मम ॥ ८ ॥ वाक्पुटाचत्रिवर्ण्णात्माकण्ठम्पातुपराम्बिका ॥ श्रींस्कन्धौपातुनियतंह्रींभुजौपातुसर्व्वदा ॥ ९ ॥ क्लींकरौत्रिपुटेशानीत्रिपुटैश्वर्य्यदायिनी ॥ ओम्पातुहृदयंह्रींमे मध्यदेशंसदाऽवतु ॥ १० ॥ क्रौंपातुनाभिदेशंसाव्यक्षरीभुवनेश्वरी ॥ सर्व्वबीजप्रदापृष्ठम्पातुसर्व्ववशङ्करी॥११॥ ह्रींपातुगुददेशम्मेनमोभगवतीकटीम् ॥ माहेश्वरीसदापातुसक्थिनीजानुयुग्मकम् ॥ १२ ॥ अन्नपूर्ण्णासदापातुस्वाहापातुपदद्वयम्॥सप्तदशाक्षरीपायादन्नपूर्ण्णात्मिकापुरा ॥ १३ ॥ तारम्मायारमाकामःपोडशार्ण्णो ततः परम् ॥ शिरःस्थासर्व्वदापातुविंशत्यर्ण्णात्मिकापरा ॥ १४ ॥ तारन्दुर्ग्गेयुगंरक्षिणीस्वाहेतिदशाक्षरी ॥ जयदुर्ग्गाघनश्यामापातुमाम्पूर्व्वतोमुदा ॥ १५ ॥मायावीजादिकाचैपादशार्ण्णा चपरातथा ॥ उत्तप्तकाञ्चनाभासाजयदुर्ग्गाननेवतु ॥१६॥ तारंह्रींदुन्दुर्ग्गायैनमोष्टार्ण्णात्मिकापरा॥ शङ्खचक्रधनुर्ब्बाणधरामान्दक्षिणेऽवतु ॥ १७ ॥ महिषामर्दिनिस्वाहावसुवर्ण्णात्मिकापरा ॥ नैर्ऋत्यांसर्व्वदापातुमहिषासुरनाशिनी ॥१८॥ मायापद्मावतीस्वाहा सप्तार्ण्णापरिकीर्त्तिता ॥ पद्मावतीपद्मसँस्थापश्चिमेमांसदावतु ॥ १९ ॥ पाशाङ्कुशपुटामायेहिपरमेश्वरिस्वाहा ॥ त्रयोदशार्ण्णाताराद्या अश्वारू

ढाननेऽवतु ॥ २० ॥ सरस्वतीपञ्चशरेनित्यक्लिन्नेमदद्रवे ॥ स्वाहारव्यक्षरीविद्यामामुत्तरेसदावतु ॥ २१ ॥ तारम्मायातुक वचङ्केरक्षेत्सततव्वँधूः ॥ हूँक्षेह्रींफट्महाविद्याद्वादशार्ण्णाखिल प्रदा ॥ २२ ॥ त्वरिताष्टाहिभिः पायाच्छिवकोणेसदाचमाम् ॥ ऐंक्लींसौःसाततोबालामामूर्द्धदेशतोऽवतु ॥ २३ ॥ विन्द्धन्ताभैर वीबालाभूमौचमांसदावतु ॥ इतितेकथितम्पुण्यन्त्रैलोक्यमङ्गल म्परम् ॥२४॥सारंसारतरम्पुण्यम्महाविद्यौघविग्रहम् ॥ अस्यापि पठनात्सद्यः कुबेरोपिधनेश्वरः ॥ २५ ॥ इन्द्राद्याःसकलादेवाः पठनाद्धारणाद्यतः ॥ सर्व्वसिद्धीश्वराःसन्तःसर्व्वैश्वर्यमवाप्नुयुः ॥ २६ ॥ पुष्पाञ्जल्यष्टकन्दत्त्वामूलेनैवपठेत्सकृत् ॥ सव्वँत्सर कृतायास्तुपूजायाः फलमाप्नुयात् ॥ २७ ॥ प्रीतिमन्योन्यतः कृत्वाकमलानिश्चलागृहे ॥ वाणीचनिवसेद्वक्त्रे सत्यंसत्यन्नसंश यः ॥ २८ ॥ योधारयतिपुण्यात्मात्रैलोक्यमङ्गलाभिधम् ॥ कव चम्परमम्पुण्यंसोऽपिपुण्यवताव्वँरः ॥ २९ ॥ सर्व्वैश्वर्ययुतो भूत्वात्रैलोक्यविजयीभवेत् ॥ पुरुषोदक्षिणेवाहौनारीवामभुजे तथा ॥ ३० ॥ वहुपुत्रवतीभूत्वावन्ध्यापिलभतेसुतम् ॥ ब्रह्मा स्त्रादीनिशस्त्राणिनैवकृन्तन्तितज्जनम् ॥ ३१ ॥ एतत्कवचम ज्ञात्वायोजपेद्भुवनेश्वरीम् ॥ दारिद्र्यम्परमम्प्राप्यसोऽचिरान्मृत्यु माप्नुयात् ॥ ३२ ॥ इतिरुद्रयामलेदेवीश्वरसव्वँादेत्रैलोक्यमङ्ग लन्नामभुवनेश्वरीकवचंसमाप्तम् ॥

अथ हृदयम् ।

देव्युवाच ॥ भगवन्ब्रूहितत्स्तोत्रंसर्व्वकामप्रसाधनम् ॥ य स्यश्रवणमात्रेणनान्यच्छ्रोतव्यमिष्यते ॥ १ ॥ यदिमेऽनुग्रहः कार्य्यः प्रीतिश्चापिममोपरि ॥ तदिदङ्कथयब्रह्मन्विमलय्यँन्महीतले ॥ २ ॥ ईश्वरउवाच ॥ शृणुदेविप्रवक्ष्यामि सर्व्वकामप्र साधनम् ॥ हृदयम्भुवनेश्वर्य्यास्स्तोत्रमस्तियशोदयम् ॥ ३ ॥ ॐअस्यश्रीभुवनेश्वरीहृदयस्तोत्रमन्त्रस्यशक्तिर्ऋषिर्ग्गायत्रीच्छ न्दोभुवनेश्वरीदेवताहकारोबीजंईकारःशक्तीरेफः कीलकंसकल मनोवाञ्छितसिद्धयर्थेपाठेविनियोगः ॥ अथाङ्गन्यासः ॥ ॐ ह्रींहृदयायमः ॐ श्रींशिरसेस्वाहा ॐऐंशिखायैवषट् ॐह्रींक वचायहूम् ॐश्रींनेत्रत्रयायवौषट् ॐऐंअस्त्रायफट् ॥ एवङ्करन्या सः ॥ अथध्यानम् ॥ ध्यायेद्ब्रह्मादिकानाङ्कृतजनिजननीय्यँो गिनीय्यँोगयोनिन्देवानाञ्जीवनायोज्ज्वलितजयपरज्योतिरुग्रा ङ्कधात्रीम् ॥ शङ्खञ्चक्रञ्चबाणान्धनुरपिदधतीन्दोश्चतुष्काम्बुजातै र्म्मायामाद्याँव्विशिष्टाम्भवभवभुवनाम्भूभवभारभूमिम्॥ ४ ॥य दाज्ञयायोजगदाद्यशेषंसृजत्यजश्श्रीपतिरौरसव्वँा ॥ विभर्त्तिसं हन्तिभवस्तदन्ते भजामहेश्रीभुवनेश्वरीन्ताम् ॥ ५ ॥ ज गज्जनानन्दकरीञ्जयाख्याय्यँशस्विनीय्यँन्त्रसुयज्ञयोनिम् ॥ जि तामितामित्रकृतप्रपञ्चाम्भजामहेश्रीभुवनेश्वरीन्ताम् ॥ ६ ॥ हरौप्रसुप्तेभुवनत्रयान्ते अवातरन्नाभिजपद्मजन्मा ॥ विधिस्ततो ऽन्धेविदधारयत्पदम्भजामहेश्रीभुवनेश्वरीन्ताम् ॥ ७ ॥ नविद्य तेक्वापितुजन्मयस्या नवास्थितिस्सान्ततिकीहयस्याः ॥ नवा निरोधेऽखिलकर्म्मयस्या भजा० ॥ ८ ॥ कटाक्षमोक्षाचरणोग्र वित्तानिवेशिताण्णाँःकरुणार्द्रचित्ता ॥ सुभक्तयेएतिसमीप्सित य्यँा भजा० ॥ ९ ॥ यतो जगज्जन्मबभूवयोनेस्तदेवमध्येप्रतिपा तियाव्वँा ॥ तदत्तियान्तेऽखिलमुग्रकाली भ० ॥ १० ॥ सुषु प्तिकालेजनमध्ययन्त्या ययाजनस्वप्नमवैतिकिञ्चित् ॥ प्रबुद्धच तेजाग्रतेजीवएष भ० ॥ ११ ॥ दयास्फुरत्कोरकटाक्षलाभा न्नकेत्रयस्याःप्रलभन्तिसिद्धाः ॥ कवित्वमीशित्वमपिस्वतन्त्रा

तले ॥ २ ॥ ईश्वरउवाच ॥ शृणुदेविप्रवक्ष्यामि सर्व्वकामप्र
साधनम् ॥ हृदयम्भुवनेश्वर्य्यास्स्तोत्रमस्तियशोदयम् ॥ ३ ॥
ॐअस्यश्रीभुवनेश्वरीहृदयस्तोत्रमन्त्रस्यशक्तिर्ऋषिर्गायत्रीच्छ
न्दोभुवनेश्वरीदेवताहकारोबीजंईकारःशक्तीरेफ×कीलकंसकल
मनोवाञ्छितसिद्ध्यर्त्थेपाठेविनियोगः ॥ अथाङ्गन्यासः ॥ ॐ
ह्रींहृदयायनमः ॐ श्रींशिरसेस्वाहा ॐऐंशिखायैवषट् ॐह्रींक
वचायहूम् ॐश्रींनेत्रत्रयायवौषट् ॐऐंअस्त्रायफट् ॥ एवङ्करन्या
सः ॥ अथध्यानम् ॥ ध्यायेद्ब्रह्मादिकानाङ्कृतजनिजननीय्यो
गिनीय्योगयोनिन्देवानाञ्जीवनायोज्ज्वलितजयपरज्योतिरुग्रा
ङ्कधात्रीम् ॥ शङ्खञ्चक्रञ्चबाणान्धनुरपिदधतीन्दोश्चतुष्काम्बुजातै
र्म्मायामाद्याँव्विशिष्टाम्भवभवभुवनाम्भूभवाभारभूमिम्॥ ४ ॥य
दाज्ञयायोजगदाद्यशेषंसृजत्यजश्श्रीपतिरौरसञ्चा ॥ विभर्त्तिसं
हन्तिभवस्तदन्ते भजामहेश्रीभुवनेश्वरीन्ताम् ॥ ५ ॥ ज
गज्जनानन्दकरीजयाख्याय्यशस्विनीय्यन्त्रसुयज्ञयोनिम् ॥ जि
तामितामित्रकृतप्रपञ्चाम्भजामहेश्रीभुवनेश्वरीन्ताम् ॥ ६ ॥
हरौप्रसुप्तेभुवनत्रयान्ते अवातरन्नाभिजपद्मजन्मा ॥ विधिस्ततो
ऽन्धेविदधारयत्पदम्भजामहेश्रीभुवनेश्वरीन्ताम् ॥ ७ ॥ नविद्य
तेक्वापितुजन्मयस्या नवास्थितिस्सान्ततिकीहयस्याः ॥ नवा
निरोधेऽखिलकर्म्मयस्या भजा० ॥ ८ ॥ कटाक्षमोक्षाचरणोग्र
वित्तानिवेशिताण्णाँ×करुणार्द्रचित्ता ॥ सुभक्तयेएतिसमीप्सित
य्यँया भजा० ॥ ९ ॥ यतो जगज्जन्मबभूवयोनेस्तदेवमध्येप्रतिपा
तियाँव्वा ॥ तदत्तियान्तेऽखिलमुग्रकाली भ० ॥ १० ॥ सुषु
प्तिकालेजनमध्ययन्त्या ययाजनस्वप्नमवैतिकिञ्चित् ॥ प्रबुद्धय
तेजाग्रतेजीवएष भ० ॥ ११ ॥ दयास्फुरत्कोरकटाक्षलाभा
न्नकेत्रयस्या×प्रलभन्तिसिद्धाः ॥ कवित्वमीशित्वमपिस्वतन्त्रा

भ० ॥ १२ ॥ लसन्मुखाम्भोरुहसुत्फुरन्तंहृदिप्राणिध्यायदिशि स्फुरन्तः ॥ यस्या×कृपार्द्रम्प्रविकाशयन्ति भ० ॥ १३ ॥ य दानुरागानुगतालिचित्राश्चिरन्तनप्रेमपरिप्लुताङ्गाः ॥ सुनिर्भया स्सन्तिप्रमुद्यस्या भ० ॥ १४ ॥ हरिर्विराञ्चिर्हरर्इशितार×पु रोऽवतिष्ठन्तिपरन्नताङ्गाः ॥ यस्यास्समिच्छन्तिसदानुकूल्यम्भ जा० ॥ १५ ॥ मनुर्य्यदीयंहरमग्निसँस्थन्ततश्चवामश्रुतिचन्द्रस क्तम् ॥ जपन्तियेस्युस्सुरवन्दितास्ते भजा० ॥ १६ ॥ प्र सीदतुप्रेमरसार्द्रचित्तासदाहिसाश्रीभुवनेश्वरीमे ॥ कृपाकटाक्षेण कुवेरकल्पाभवन्तियस्या×पदभक्तिभाजः ॥ १७ ॥ मुदासुपा ठ्यम्भुवनेश्वरीयंसदासतांस्तोत्रमिदंसुसेव्यम् ॥ सुखप्रदंस्या त्कलिकल्मषघ्नं सुश्रृण्वतांसम्पठताम्प्रशस्यम् ॥ १८ ॥ ए तत्तुहृदयस्तोत्रम्पठेद्यस्तुसमाहितः ॥ भवेत्तस्येष्टदादेवीप्रस न्नाभुवनेश्वरी ॥ १९ ॥ ददातिधनमायुष्यम्पुण्यम्पुण्यमतिन्त था ॥ नैष्टिकीन्देवभक्तिञ्चगुरुभक्तिँव्विशेषतः ॥ २० ॥ पूर्णि मायाञ्चतुर्दश्याङ्कुजवारेविशेषतः ॥ पठनीयमिदंस्तोत्रन्देवस ञ्जनियत्नतः ॥ २१ ॥ यत्रकुत्रापिपाठेन स्तोत्रस्यास्यफल म्भवेत् ॥ सर्व्वस्थानेषुदेवेश्या×पूतदेहस्सदापठेत् ॥ २२ ॥ इति नीलसरस्वतीतन्त्रेभुवनेश्वरीपटलेश्रीदेवीश्वरसँवादे श्रीभुवने श्वरीहृदयस्तोत्रंसमाप्तम् ॥

अथ शतनाम ।

कैलासशिखरेरम्ये नानारत्नोपशोभिते ॥ नरनारीहितार्त्था यशिवम्पप्रच्छपार्व्वती ॥ १ ॥ देव्युवाच ॥ भुवनेश्वरीमहा विद्यानाम्नामष्टोत्तरंशतम् ॥ कथयस्वमहादेवयद्यहन्तववल्लभा ॥ २ ॥ ईश्वरउवाच ॥ शृणुदेविमहाभागेस्तवराजमिदंशुभम् ॥

सहस्रनाम्नामधिकंसिद्धिदम्मोक्षहेतुकम् ॥ ३ ॥ शुचिर्भूत्वा तरुत्थायपठितव्यंसमाहितैः ॥ त्रिकालंश्रद्धयायुक्तैः सर्व्वकाम फलप्रदम् ॥ ४ ॥ ॐ अस्यश्रीभुवनेश्वर्य्यष्टोत्तरशतनामस्तो त्रस्यशक्तिर्ऋषिर्ग्गायत्रीच्छन्दोभुवनेश्वरीदेवताचतुर्व्वर्ग्गसाधने जपेविनियोगः ॥ महामायामहाविद्यामहायोगामहोत्कटा ॥ मा हेश्वरीकुमारीचब्रह्माणीब्रह्मरूपिणी ॥ ५ ॥ वागीश्वरीयोग रूपायोगिनीकोटिसेविता ॥ जयाचविजयाचैवकौमारीसर्व्वम ङ्गला ॥ ६ ॥ हिङ्गुलाचविलासीच ज्वालिनीज्वालरूपिणी ॥ ईश्वरीक्रूरसंहारीकुलमार्ग्गप्रदायिनी ॥ ७ ॥ वैष्णवीसुभगाका री सुकुल्याकुलपूजिता ॥ वामाङ्गावामचाराचवामदेवप्रियात था ॥ ८ ॥ डाकिनीयोगिनीरूपाभूतेशीभूतनायिका ॥ पद्मावती पद्मनेत्राप्रबुद्धाचसरस्वती ॥ ९ ॥ भूचरीखेचरीमायामातङ्गी भुवनेश्वरी॥कान्तापतिव्रतासाक्षीसुचक्षुरकुण्डवासिनी ॥ १० ॥ उमाकुमारीलोकेशीसुकेशीपद्मरागिणी ॥ इन्द्राणीब्रह्मचा ण्डालीचण्डिकावायुवल्लभा ॥ ११ ॥ सर्व्वधातुमयीमूर्त्तिर्ज्जल रूपाजलोदरी ॥ आकाशीरणगाचैवनृकपालविभूषणा ॥ १२ ॥ नर्म्मदामोक्षदाचैवकामधर्म्मार्त्थदायिनी ॥ गायत्रीचाथसावित्री त्रिसन्ध्यातीर्त्थगामिनी ॥ १३ ॥ अष्टमीनवमीचैवदशम्येकाद शीतथा ॥ पौर्ण्णमासीकुहूरूपातिथिमूर्त्तिस्वरूपिणी ॥ १४ ॥ सुरारिनाशकारीचउग्ररूपाचवत्सला ॥ अनलाअर्द्धमात्राच अ रुणापीतलोचना ॥ १५ ॥ लज्जासरस्वतीविद्याभवानीपाप नाशिनी ॥ नागपाशधरामूर्त्तिरगाधावृतकुण्डला ॥ १६ ॥ क्षत्ररूपीक्षयकरीतेजस्विनीशुचिस्मिता ॥ अव्यक्ताव्यक्तलो काचशम्भुरूपामनस्विनी ॥ १७ ॥ मातङ्गीमत्तमातङ्गी महादे वप्रियासदा ॥ दैत्यहाचैववाराहीसर्व्वशास्त्रमयीशुभा ॥ १८ ॥

यइदम्पठतेभक्त्याशृणुयाद्वासमाहितः ॥ अपुत्रोलभतेपुत्रन्निर्द्धनोधनवान्भवेत् ॥ १९ ॥ मूक्खोंपिलभतेशास्त्रञ्चौरोपिलभतेगतिम् ॥ वेदानाम्पाठकोविप्रः क्षत्रियोविजयीभवेत् ॥ २० ॥ वैश्यस्तुधनवान्भूयाच्छूद्रस्तुसुखमेधते ॥ अष्टम्याञ्चचतुर्दश्यान्नवम्याञ्चैकचेतसः ॥ २१ ॥ येपठन्तिसदाभक्त्यानतेवैदुःखभागिनः ॥ एककालन्द्विकालञ्च्वात्रिकालञ्च्वाचतुर्थकम् ॥ २२ ॥ येपठन्तिसदाभक्त्यास्वर्ग्गलोकेचपूजिताः ॥ रुद्रन्दृष्ट्वायथादेवाः पन्नगागरुडंय्यथा ॥ २३ ॥ शत्रवःप्रपलायन्तेतस्यवक्त्रविलोकनात् ॥ इतिश्रीरुद्रयामलेदेवीशङ्करसंवादेभुवनेश्वर्य्यष्टोत्तरशतनामस्तोत्रंसमाप्तम् ॥

अथ सहस्रनाम ।

ओमस्यश्रीभुवनेश्वरीसहस्रनाममन्त्रस्यसदाशिवऋषिरनुष्टुप्छन्दःभुवनेश्वरीदेवतालज्जाबीजम्कमलाशक्तिःवाग्भवङ्कीलकम् सर्व्वार्त्थसाधनेजपेविनियोगः ॥ भुवनेशीभुवाराध्याभवानी भयनाशिनी ॥ भवरूपाभवानन्दाभवसागरतारिणी ॥ १ ॥ भवोद्भवाभवरताभवभारनिवारिणी ॥ भव्यानाभव्यनयनाभव्यरूपाभवौषधिः ॥ २ ॥ भव्याङ्गनाभव्यकेशी भवपाशविमोचिनी ॥ भव्यासनाभव्यवस्त्राभव्याभरणभूषिता ॥ ३ ॥ भगरूपाभगानन्दाभगेशीभगमालिनी ॥ भगविद्याभगवतीभगक्लिन्नाभगावहा ॥ ४ ॥ भगाङ्कुराभगक्रीडाभगाढ्याभगमङ्गला ॥ भगलीला भगप्रीताभगसम्पद्भगेश्वरी ॥ ५ ॥ भगालयाभगोत्साहाभगस्थाभगपोषिणी ॥ भगोत्सवाभगविद्याभगमाताभगस्थिता ॥ ६ ॥ भगशक्तिर्ब्भगनिधिर्ब्भगपूजाभगेषणा ॥ भगास्वपाभगाधीशाभगाढ्याभगसुन्दरी ॥ ७ ॥ भगरेखाभगस्ने

हाभगस्नेहविवर्द्धिनी॥ भगिनीभगवीजस्थाभगभोगविलासिनी ॥ ८ ॥ भगाचाराभगाधाराभगाचाराभगाश्रया ॥ भगपुष्पा भगश्रीदाभगपुष्पनिवासिनी ॥ ९ ॥ भव्यरूपधराभव्या भव्यपुष्पैरसंस्कृता॥ भव्यलीलाभव्यमालाभव्याङ्गीभव्यसुन्दरी ॥ १० ॥ भव्यशीलाभव्यलीलाभव्याक्षीभव्यनाशिनी ॥ भव्याङ्गिकाभव्यवाणीभव्यकान्तिर्भगालिनी ॥ ११ ॥ भव्यत्रपाभव्यनदीभव्यभोगविहारिणी ॥ भव्यस्तनी भव्यमुखीभव्यगोष्ठीभयापहा ॥ १२ ॥ भक्तेश्वरी भक्तिकरीभक्तानुग्रहकारिणी ॥ भक्तिदाभक्तिजननीभक्तानन्दविवर्द्धिनी ॥ १३ ॥ भक्तिप्रियाभक्तिरताभक्तिभावविहारिणी ॥ भक्तिशीलाभक्तिलीलाभक्तेशी भक्तिपालिनी ॥१४॥भक्तिविद्याभक्तविद्याभक्तिर्भक्तिविनोदिनी ॥ भक्तिरीतिर्भक्तिप्रीतिर्भक्तिसाधनसाधिनी॥१५॥ भक्तिसाध्याभक्तसाध्याभक्तिरालीभवेश्वरी ॥ भटविद्याभटानन्दाभटस्थाभटरूपिणी ॥ १६ ॥ भटमान्याभटस्थान्याभटस्थानानिवासिनी ॥ भटिनीभटरूपेशीभटरूपविवर्द्धिनी ॥ १७ ॥ भटवेशीभटेशीचभगभाग्यवसुन्दरी ॥ भटप्रीत्याभटरीत्याभटानुग्रहकारिणी ॥ १८ ॥ भटैराध्याभटबोध्याभटबोधविनोदिनी ॥ भटैस्सेव्याभटवराभटार्च्याभटबोधिनी ॥ १९ ॥ भटकीर्त्त्याभटकला भटपाभटपालिनी ॥ भटैश्वर्य्याभटाधीशाभटेक्षाभटतोषिणी ॥ २० ॥ भटेशीभटजननीभटभाग्यविवर्द्धिनी ॥ भटमुक्तिर्भटयुक्तिर्भटप्रीतिविवर्द्धिनी ॥ २१ ॥ भाग्येशीभाग्यजननीभाग्यस्थाभाग्यरूपिणी ॥ भावनाभावकुशलाभावदाभाववर्द्धिनी ॥ २२ ॥ भावरूपाभावरसाभावान्तरविहारिणी ॥ भावाङ्कुराभावकलाभावस्थाननिवासिनी ॥ २३ ॥ भावातुराभावधृताभावमध्यव्यवस्थिता ॥ भावऋद्धिर्भावसिद्धिर्भा

वादिर्भावभाविनी ॥ २४ ॥ भावालयाभावपराभावसाधनतत्पर ॥ भावेश्वरीभावगम्याभावस्थाभावगर्व्विता ॥ २५ ॥ भाविनीभावरमणी भारतीभारतेश्वरी ॥ भागीरथीभाग्यवतीभाग्योदयकरीकला ॥ २६ ॥ भाग्याश्रयाभाग्यमयीभाग्याभाग्यफलप्रदा ॥ भाग्यचाराभाग्यसाराभाग्यधाराचभाग्यदा ॥ २७ ॥ भाग्येश्वरीभाग्यनिधिर्भाग्याभाग्यसुमातृका ॥ भाग्येक्षाभाग्यनाभाग्यभाग्यदाभाग्यमातृका ॥ २८ ॥ भाग्येक्षाभाग्यमनसा भाग्यादिर्भाग्यमध्यगा ॥ भ्रातेश्वरीभ्रातृवतीभ्रात्र्यम्बाभ्रातृपालिनी ॥ २९ ॥ भ्रातृस्थाभ्रातृकुशलाभ्रामरीभ्रमराम्बिका ॥ भिल्लरूपाभिल्लवतीभिल्लस्थाभिल्लपालिनी ॥ ३० ॥ भिल्लमाताभिल्लधात्रीभिल्लनीभिल्लकेश्वरी ॥ भिल्लकीर्त्तिर्भिल्लकलाभिल्लमन्दरवासिनी ॥ ॥ ३१ ॥ भिल्लक्रीडाभिल्ललीलाभिल्लाच्र्च्यांभिल्लवल्लभा ॥ भिल्लस्तुषाभिल्लपुत्रीभिल्लनीभिल्लपोषिणी ॥ ३२ ॥ भिल्लपौत्रीभिल्लगोष्ठी भिल्लाचारनिवासिनी ॥ भिल्लपूज्याभिल्लवाणीभिल्लानीभिल्लभीतिहा ॥ ३३ ॥ भीतस्थाभीतजननीभीतिर्भीतिविनाशिनी ॥ भीतिदाभीतिहाभीत्याभीत्याकारविहारिणी ॥ ३४ ॥ भीतेशीभीतिशमनीभीतस्थाननिवासिनी ॥ भीतिरीत्याभीतिकलाभीतीक्षाभीतिहारिणी ॥ ३५ ॥ भीमेशीभीमजननीभीमाभीमनिवासिनी ॥ भीमेश्वरीभीमरताभीमाङ्गीभीमपालिनी ॥ ३६ ॥ भीमनादीभीमतन्त्रीभीमैश्वर्य्यविवर्द्धिनी ॥ भीमगोष्ठीभीमधात्रीभीमविद्याविनोदिनी ॥ ३७ ॥ भीमविक्रमदात्रीचभीमविक्रमवासिनी ॥ भीमानन्दकरीदेवीभीमानन्दविहारिणी ॥ ३८ ॥ भीमोपदेशिनीनित्याभीमभाग्यप्रदायिनी ॥ भीमसिद्धिर्भीमऋद्धिर्भीमभक्तिविवर्द्धिनी ॥ ३९ ॥ भीमस्थाभीमवरदाभीमधर्म्मोपदेशिनी ॥ भीष्मेश्वरीभीष्मभृतीभीष्मबोधप्रबोधिनी ॥ ४० ॥

भीष्मश्रीर्भीष्मजननीभीष्मज्ञानोपदेशिनी ॥ भीष्मस्थाभीष्म तपसाभीष्मेशीभीष्मतारिणी ॥ ४१ ॥भीष्मलीलाभीष्मशीला भीष्मरोदिनिवासिनी ॥ भीष्माश्रयाभीष्मवराभीष्महर्ष्पविवर्द्धिनी ॥ ४२ ॥ भुवनाभुवनेशानीभुवनानन्दकारिणी ॥ भुविस्थाभुविरूपाचभुविभारनिवारिणी ॥ ४३ ॥ भुक्तिस्थाभुक्तिदा भुक्तिर्भुक्तेशीभुक्तिरूपिणी ॥ भुक्तेश्वरीभुक्तिदात्रीभुक्तिराकाररूपिणी॥४४॥भुजङ्गस्थाभुजङ्गेशीभुजङ्गाकाररूपिणी ॥भुजङ्गीभुजगावासाभुजङ्गानन्ददायिनी ॥४५॥ भूतेशीभूतजननीभूतस्था भूतरूपिणी॥ भूतेश्वरीभूतलीलाभूतवेषकरीसदा॥४६॥भूतदात्री भूतकेशीभूतधात्रीमहेश्वरी ॥ भूतरीत्याभूतपत्नीभूतलोकनिवासिनी ॥४७॥ भूतसिद्धिर्भूतऋद्धिर्भूतानन्दनिवासिनी॥भूत कीर्त्तिर्भूतलक्ष्मीर्भूतभाग्यविवर्द्धिनी ॥ ४८॥ भूतार्च्याभूतरमणीभूतविद्याविनोदिनी ॥ भूतपौत्रीभूतपुत्रीभूतभार्य्याविधेश्वरी ॥ ४९ ॥ भूपस्थाभूपरमणीभूपेशीभूपपालिनी ॥ भूपमाताभूपनिभाभूपैश्वर्य्यप्रदायिनी ॥ ५० ॥ भूपचेष्टाभूपनेष्टाभूपभावविवर्द्धिनी ॥ भूपभगिनीभूपभूरीभूपपौत्रीतथावधूः ॥ ५१ ॥ भूपकीर्त्तिर्भूपनीतिर्भूपभाग्यविवर्द्धिनी॥ भूपक्रियाभूपक्रीडाभूपमन्दरवासिनी ॥ ५२ ॥ भूपार्च्याभूपसँराध्याभूपभोगविवर्द्धिनी॥ भूपाश्रयाभूपकालाभूपकौतुकदण्डिनी ॥ ५३ ॥ भूषणस्थाभूषणेशीभूषाभूषणधारिणी ॥भूषणाधारधर्म्मेशीभूषणाकाररूपिणी ॥५४॥ भूपताचारनिलयाभूपताचारभूषिता ॥ भूपताचाररचनाभूपताचारमण्डिता ॥ ५५॥भूपताचारधर्म्मेशीभूपताचारकारिणी॥भूपताचारचरिताभूपताचारवर्ज्जिता ॥ ५६ ॥भूपताचारवृद्धिस्थाभूपताचारवृद्धिदा ॥ भूपताचारकरणाभूपताचारकर्म्मदा ॥ ५७ ॥ भूपताचारकर्म्मेशीभूपताचारकर्म्मदा ॥ भूपताचार

देहस्थाभूपताचारकर्म्मिणी ॥ ५८ ॥ भूपताचारसिद्धिस्थाभूप
ताचारसिद्धिदा ॥ भूपताचारधर्म्माणीभूपताचारधारिणी ॥
॥ ५९ ॥ भूपतानन्दलहरीभूपतेश्वररूपिणी ॥ भूपतेर्न्नीतिनी
तिस्थाभूपतिस्थानवासिनी ॥ ६० ॥ भूपतिस्थानगीर्व्वाणीभूप
तेर्व्वरधारिणी ॥ ६१ ॥ भेषजानन्दलहरीभेषजानन्दरूपिणी ॥
भेषजानन्दमहिषीभेषजानन्दरूपिणी ॥ ६२ ॥ भेषजानन्दक
र्म्मेशीभेषजानन्ददायिनी॥भेषजीभेषजाकन्दाभेषजस्थानवासि
नी ॥ ६३ ॥ भेषजेश्वररूपाचभेषजेश्वरसिद्धिदा ॥ भेषजेश्वर
धर्म्मेशीभेषजेश्वरकर्म्मदा ॥ ६४ ॥ भेषजेश्वरकर्म्मेशीभेषजेश्व
रकर्म्मिणी ॥ भेषजाधीशजननीभेषजाधीशपालिनी ॥ ६५ ॥
भेषजाधीशरचनाभेषजाधीशमङ्गला॥ भेषजारण्यमध्यस्थाभेष
जारण्यरक्षिणी ॥ ६६ ॥ भैषज्यविद्याभैषज्याभैषज्येप्सितदा
यिनी ॥ भैषज्यस्थाभैषजेशीभैषज्यानन्दवर्द्धिनी ॥ ६७ ॥ भैर
वीभैरवाचाराभैरवाकाररूपिणी ॥ भैरवाचारचतुराभैरवाचारम
ण्डिता ॥ ६८ ॥ भैरवाच भैरवेशीभैरवानन्ददायिनी ॥ भैरवा
नन्दरूपेशीभैरवानन्दरूपिणी ॥ ६९ ॥ भैरवानन्दनिपुणाभैर
वानन्दमन्दिरा॥भैरवानन्दतत्त्वज्ञाभैरवानन्दतत्परा ॥ ७० ॥
भैरवानन्दकुशलाभैरवानन्दनीतिदा ॥ भैरवानन्दप्रीतिस्थाभैर
वानन्दप्रीतिदा ॥ ७१ ॥ भैरवानन्दमहिषीभैरवानन्दमालिनी
॥ भैरवानन्दमतिदाभैरवानन्दमातृका ॥ ७२ ॥ भैरवाधारजन
नीभैरवाधाररक्षिणी ॥ भैरवाधाररूपेशीभैरवाधाररूपिणी ॥
॥ ७३ ॥ भैरवाधारनिचयाभैरवाधारनिश्चया ॥ भैरवाधारत
त्त्वज्ञाभैरवाधारतत्त्वदा॥७४॥भैरवाश्रयतन्त्रेशीभैरवाश्रयमन्त्रि
णी॥भैरवाश्रयरचनाभैरवाश्रयरञ्जिता ॥७५॥ भैरवाश्रयनिर्द्धारा
भैरवाश्रयनिर्भरा॥भैरवाश्रयनिर्द्धाराभैरवाश्रयनिर्द्धरा ॥ ७६ ॥

भैरवानन्दबोधेशीभैरवानन्दबोधिनी ॥ भैरवानन्दबोधस्थाभैरवानन्दबोधदा ॥ ७७ ॥ भैरव्यैश्वर्य्यवरदाभैरव्यैश्वर्य्यदायिनी ॥ भैरव्यैश्वर्य्यरचनाभैरव्यैश्वर्य्यवर्द्धिनी ॥ ७८ ॥ भैरव्यैश्वर्य्यसिद्धिस्थाभैरव्यैश्वर्य्यसिद्धिदा ॥ भैरव्यैश्वर्य्यसिद्धेशीभैरव्यैश्वर्य्यरूपिणी ॥ ७९ ॥ भैरव्यैश्वर्य्यसुपथाभैरव्यैश्वर्य्यसुप्रभा ॥ भैरव्यैश्वर्य्यवृद्धिस्थाभैरव्यैश्वर्य्यवृद्धिदा ॥ ८० ॥ भैरव्यैश्वर्य्यकुशलाभैरव्यैश्वर्य्यकामदा ॥ भैरव्यैश्वर्य्यसुलभाभैरव्यैश्वर्य्यसम्प्रदा ॥ ८१ ॥ भैरव्यैश्वर्य्यविशदाभैरव्यैश्वर्य्यविक्रिता ॥ भैरव्यैश्वय्यविनयाभैरव्यैश्वर्य्यवेदिता ॥ ८२ ॥ भैरव्यैश्वर्य्यमहिमाभैरव्यैश्वर्य्यमानिनी ॥ भैरव्यैश्वर्य्यनिरताभैरव्यैश्वर्य्यनिर्म्मिता ॥ ८३ ॥ भोगेश्वरीभोगमाताभोगस्थाभोगरक्षिणी ॥ भोगक्रीडाभोगलीलाभोगेशीभोगवर्द्धिनी ॥ ८४ ॥ भोगाङ्गीभोगरमणीभोगाचारविचारिणी ॥ भोगाश्रयाभोगवतीभोगिनीभोगरूपिणी ॥ ८५ ॥ भोगाङ्कुराभोगविधाभोगाधारनिवासिनी ॥ भोगाम्बिकाभोगरताभोगसिद्धिविधायिनी ॥ ८६ ॥ भोजस्थाभोजनिरताभोजनानन्ददायिनी ॥ भोजनानन्दलहरीभोजनान्तर्व्विहारिणी ॥ ८७ ॥ भोजनानन्दमहिमा भोजनानन्दभोग्यदा ॥ भोजनानन्दरचनाभोजनानन्दहर्षिता ॥ ८८ ॥ भोजनाचारचतुराभोजनाचारमण्डिता ॥ भोजनाचारचरिताभोजनाचारचर्च्चिता ॥ ८९ ॥ भोजनाचारसम्पन्ना भोजनाचारसय्युता ॥ भोजनाचारचित्तस्थाभोजनाचाररीतिदा ॥ ९० ॥ भोजनाचारविभवाभोजनाचारविस्तृता ॥ भोजनाचाररमणीभोजनाचाररक्षिणी ॥ ९१ ॥ भोजनाचारहरिणी भोजनाचारभक्षिणी ॥ भोजनाचारसुखदाभोजनाचारसुस्पृहा ॥ ९२ ॥ भोजनाहारसुरसाभोजनाहारसुन्दरी ॥ भोजनाहारच

रिताभोजनाहारचञ्चला ॥ ९३ ॥ भोजनास्वादविभवाभोजना स्वादवल्लभा ॥ भोजनास्वादसन्तुष्टाभोजनास्वादसम्प्रदा॥९४॥ भोजनास्वादसुपथाभोजनास्वादसंश्रया ॥ भोजनास्वादनिर ताभोजनास्वादनिर्ण्णिता ॥ ९५ ॥ भौक्षराभौक्षरेशानीभौकारा क्षररूपिणी ॥ भौक्षरस्थाभौक्षरादिर्भौक्षरस्थानवासिनी ॥ ॥ ९६ ॥ भङ्गारीभर्म्मिणीभर्म्मीभस्मेशीभस्मरूपिणी ॥ भङ्गा रामञ्चनाभस्माभस्मस्थाभस्मवासिनी ॥ ९७ ॥ भक्षरीभक्षरा काराभक्षरस्थानवासिनी ॥ भक्षराढ्याभक्षरेशीभरूपाभस्वरूपि णी ॥ ९८ ॥ भूधरस्थाभूधरेशीभूधरीभूधरेश्वरी ॥ भूधरानन्द रमणीभूधरानन्दपालिनी ॥ ९९ ॥ भूधरानन्दजननीभूधरान न्दवासिनी ॥ भूधरानन्दरमणीभूधरानन्दरक्षिता ॥ १०० ॥ भू धरानन्दमहिमाभूधरानन्दमन्दिरा॥ भूधरानन्दसर्व्वेशीभूधरान न्दसर्व्वसूः ॥ १०१ ॥ भूधरानन्दमहिर्षीभूधरानन्ददायिनी॥भू धराधीशधर्म्मेशीभूधरानन्दधर्म्मिणी ॥ १०२ ॥ भूधराधीशध र्म्मेशी भूधराधीशसिद्धिदा ॥ भूधराधीशकर्म्मेशीभूधराधीशका मिनी ॥ १०३ ॥ भूधराधीशनिरताभूधराधीशनिर्ण्णिता ॥ भव राधीशनीतिस्थाभूधराधीशनीतिदा ॥ १०४ ॥ भूधराधीशभा ग्येशीभूधराधीशभामिनी ॥ भूधराधीशबुद्धिस्थाभूधराधीशबुद्धि दा ॥ १०५ ॥ भूधराधीशवरदाभूधराधीशवन्दिता ॥ भूधराधी शाऽऽराध्याचभूधराधीशचर्च्चिता॥१०६॥भङ्गेश्वरीभङ्गमयीभङ्ग स्थाभङ्गरूपिणी ॥ भङ्गाक्षताभङ्गरताभङ्गार्च्याभङ्गरक्षिणी ॥ ॥ १०७ ॥ भङ्गावतीभङ्गलीलाभङ्गभोगविलासिनी ॥ भङ्गरङ्ग प्रतीकाराभङ्गरङ्गनिवासिनी ॥ १०८ ॥ भङ्गाशिनीभङ्गमूलीभ ङ्गभोगविधायिनी ॥ भङ्गाश्रयाभङ्गबीजाभङ्गबीजाङ्कुरेश्वरी ॥ ॥ १०९ ॥ भङ्गयन्त्रचमत्काराभङ्गयन्त्रेश्वरीतथा ॥ भङ्गयन्त्र

विमोहिस्थाभङ्गयन्त्रविनोदिनी ॥ ११० ॥ भङ्गयन्त्रविचारस्था भङ्गयन्त्रविचारिणी ॥ भङ्गयन्त्ररसानन्दाभङ्गयन्त्ररसेश्वरी ॥ ॥ १११ ॥ भङ्गयन्त्ररसस्वादाभङ्गयन्त्ररसस्थिता ॥ भङ्गयन्त्र रसाधाराभङ्गयन्त्ररसाश्रया ॥ ११२ ॥ भूधरात्मजरूपेशीभूधरा त्मजरूपिणी ॥ भूधरात्मजयोगेशीभूधरात्मजपालिनी ॥११३॥ भूधरात्मजमहिमाभूधरात्मजमालिनी॥ भूधरात्मजभूतेशीभूधरा त्मजरूपिणी ॥ ११४ ॥ भूधरात्मजसिद्धिस्था भूधरात्मजसिद्धि दा ॥ भूधरात्मजभावेशीभूधरात्मजभाविनी ॥ ११५ ॥ भूधरा त्मजभोगस्थाभूधरात्मजभोग्यदा॥ भूधरात्मजभोगेशीभूधरात्म जभोगिनी ॥ ११६ ॥ भव्याभव्यतराभव्याभाविनीभववल्लभा ॥ भावातिभावाभावाख्याभातिभाभीतिभान्तिका ॥ ११७ ॥ भा सान्तिभासाभासस्थाभासाभाभास्करोपमा ॥भास्करस्थाभास्क रेशीभास्करैश्वर्य्यवर्द्धिनी ॥ ११८ ॥ भास्करानन्दजननीभास्क रानन्ददायिनी ॥ भास्करानन्दमहिमाभास्करानन्दमातृका ॥ ॥ ११९ ॥ भास्करानन्दनैश्वर्य्याभास्करानन्दनेश्वरा ॥ भास्क रानन्दसुपथाभास्करानन्दसुप्रभा ॥१२०॥भास्करानन्दनिचया भास्करानन्दनिर्म्मिता ॥ भास्करानन्दनीतिस्थाभास्करानन्द नीतिदा ॥ १२१ ॥ भास्करोदयमध्यस्थाभास्करोदयमध्यगा ॥ भास्करोदयतेजःस्थाभास्करोदथतेजसा ॥ १२२ ॥ भास्करा चारचतुराभास्कराचारचन्द्रिका ॥ भास्कराचारपरमाभास्करा चारचण्डिका ॥ १२३ ॥ भास्कराचारपरमाभास्कराचारपार दा ॥ भास्कराचारमुक्तिस्थाभास्कराचारमुक्तिदा ॥ १२४ ॥ भा स्कराचारसिद्धिस्थाभास्कराचारसिद्धिदा ॥ भास्कराचरणाधा राभास्कराचरणाश्रिता ॥१२५॥ भास्कराचारमन्त्रेशीभास्करा चारमन्त्रिणी ॥ भास्कराचारवित्तेशीभास्कराचारचित्रिणी ॥

॥ १२६ ॥ भास्कराधारधर्म्मेशीभास्कराधारधारिणी ॥ भास्कराधाररचनाभास्कराधाररक्षिता ॥ १२७ ॥ भास्कराधारकर्म्माणीभास्कराधारकर्म्मदा ॥ भास्कराधाररूपेशीभास्कराधाररूपिणी ॥ १२८ ॥ भास्कराधारकाम्येशीभास्कराधारकामिनी ॥ भास्कराधारसांशेशीभास्कराधारसांशिनी ॥ १२९ ॥ भास्कराधारधर्म्मेशीभास्कराधारधामिनी ॥ भास्कराधारचक्रस्थाभास्कराधारचक्रिणी ॥ १३० ॥ भास्करेश्वरक्षत्रेशीभास्करेश्वरक्षत्रिणी ॥ भास्करेश्वरजननी भास्करेश्वरपालिनी ॥ १३१ ॥ भास्करेश्वरसर्वेशीभास्करेश्वरशर्व्वरी ॥ भास्करेश्वरसद्भीमाभास्करेश्वरसन्निभा ॥ १३२ ॥ भास्करेश्वरसुपथाभास्करेश्वरसुप्रभा ॥ भास्करेश्वरयुवतीभास्करेश्वरसुन्दरी ॥ १३३ ॥ भास्करेश्वरमूर्त्तेशीभास्करेश्वरमूर्त्तिनी ॥ भास्करेश्वरमित्रेशीभास्करेश्वरमन्त्रिणी ॥ १३४ ॥ भास्करेश्वरसानन्दाभास्करेश्वरसाश्रय ॥ भास्करेश्वरचित्रस्थाभास्करेश्वरचित्रदा ॥ १३५ ॥ भास्करेश्वरचित्रेशीभास्करेश्वरचित्रिणी ॥ भास्करेश्वरभाग्यस्थाभास्करेश्वरभाग्यदा ॥ १३६ ॥ भास्करेश्वरभाग्येशीभास्करेश्वरभाविनी ॥ भास्करेश्वरकीर्त्त्येशीभास्करेश्वरकीर्त्तिनी ॥ १३७ ॥ भास्करेश्वरकीर्त्तिस्थाभास्करेश्वरकीर्त्तिदा ॥ भास्करेश्वरकरुणाभास्करेश्वरकारिणी ॥ १३८ ॥ भास्करेश्वरगीर्व्वाणीभास्करेश्वरगारुडी ॥ भास्करेश्वरदेहस्थाभास्करेश्वरदेहदा ॥ १३९ ॥ भास्करेश्वरनादस्थाभास्करेश्वरनादिनी ॥ भास्करेश्वरनादेशीभास्करेश्वरनादिनी ॥ १४० ॥ भास्करेश्वरकोशस्थाभास्करेश्वरकोशदा ॥ भास्करेश्वरकोशेशीभास्करेश्वरकोशिनी ॥ १४१ ॥ भास्करेश्वरशक्तिस्थाभास्करेश्वरशक्तिदा ॥ भास्करेश्वरतोषेशीभास्करेश्वरतोषिणी ॥ १४२ ॥ भास्करेश्व

रक्षेत्रेशीभास्करेश्वरक्षेत्रिणी ॥ भास्करेश्वरयोगस्थाभास्करेश्वरयोगदा ॥ १४३ ॥ भास्करेश्वरयोगेशीभास्करेश्वरयोगिनी ॥ भास्करेश्वरपद्मेशीभास्करेश्वरपद्मिनी ॥ १४४ ॥ भास्करेश्वरहृद्बीजाभास्करेश्वरहृद्धरा ॥ भास्करेश्वरहृद्योनिर्भास्करेश्वरहृद्युतिः ॥ १४५ ॥ भास्करेश्वरबुद्धिस्थाभास्करेश्वरसद्धिधा ॥ भास्करेश्वरसद्बाणीभास्करेश्वरसद्धरा ॥ १४६ ॥ भास्करेश्वरराज्यस्थाभास्करेश्वरराज्यदा ॥ भास्करेश्वरराज्येशीभास्करेश्वरपोषिणी ॥ १४७ ॥ भास्करेश्वरज्ञानस्थाभास्करेश्वरज्ञानदा ॥ भास्करेश्वरज्ञानेशीभास्करेश्वरगामिनी ॥ १४८ ॥ भास्करेश्वरलक्षेशीभास्करेश्वरक्षालिता ॥ भास्करेश्वरलक्षिताभास्करेश्वररक्षिता ॥ १४९ ॥ भास्करेश्वरखड्गस्थाभास्करेश्वरखड्गदा ॥ भास्करेश्वरखड्गेशीभास्करेश्वरखड्गिनी ॥ १५० ॥ भास्करेश्वरकार्य्येशीभास्करेश्वरकामिनी ॥ भास्करेश्वरकायस्थाभास्करेश्वरकायदा ॥ १५१ ॥ भास्करेश्वरचक्षुःस्थाभास्करेश्वरचक्षुषा ॥ भास्करेश्वरसन्नाभाभास्करेश्वरसार्च्चिता ॥१५२॥ भ्रूणहत्याप्रशमनीभ्रूणपापविनाशिनी ॥ भ्रूणदारिद्र्यशमनीभ्रूणरोगविनाशिनी ॥ १५३ ॥ भ्रूणशोकप्रशमनीभ्रूणदोषनिवारिणी ॥ भ्रूणसन्तापशमनीभ्रूणविभ्रमनाशिनी ॥ १५४ ॥ भवाब्धिस्थाभवाब्धीशाभवाब्धिभयनाशिनी ॥ भवाब्धिपारकरणी भवाब्धिसुखवर्द्धिनी ॥ १५५ ॥ भवाब्धिकार्य्यकरणी भवाब्धिकरुणानिधिः ॥ भवाब्धिकालशमनीभवाब्धिवरदायिनी ॥ १५६ ॥ भवाब्धिभजनस्थानाभवाब्धिभजनस्थिताभवाब्धिभजनाकाराभवाब्धिभजनक्रिया ॥ १५७ ॥ भवाब्धिभजनाचाराभवाब्धिभजनाङ्कुरा ॥ भवाब्धिभजनानन्दाभवाब्धिभजनाधिपा ॥ १५८ ॥ भवाब्धिभजनै

श्वर्य्याभवाब्धिभजनेश्वरी ॥ भवाब्धिभजनासिद्धिर्भवाब्धिभज नारतिः ॥१५९॥ भवाब्धिभजनानित्याभवाब्धिभजनानिशा ॥ भवाब्धिभजनानिम्नाभवाब्धिभवभीतिहा ॥ १६० ॥ भवाब्धिभ जनाकाम्याभवाब्धिभजनाकला ॥ भवाब्धिभजनाकीर्त्तिर्भवा ब्धिभजनाकृता ॥१६१॥ भवाब्धिशुभदानित्याभवाब्धिशुभदा यिनी ॥ भवाब्धिसकलानन्दाभवाब्धिसकलाकला ॥ १६२॥भ वाब्धिसकलासिद्धिर्भवाब्धिसकलानिधिः॥भवाब्धिसकलासा राभवाब्धिसकलार्त्थदा ॥ १६३॥भवाब्धिभवनामूर्त्तिर्भवाब्धि भवनाकृतिः ॥ भवाब्धिभवनाभव्याभवाब्धिभवनाम्भसा ॥ ॥ १६४ ॥ भवाब्धिमदनारूपाभवाब्धिमदनातुरा ॥ भवाब्धिम दनेशानीभवाब्धिमदनेश्वरी ॥ १६५ ॥ भवाब्धिभाग्यरचनाभ वाब्धिभाग्यदासदा ॥ भवाब्धिभाग्यदाकूलाभवाब्धिभाग्यनि र्भरा ॥ १६६ ॥ भवाब्धिभाग्यनिरताभवाब्धिभाग्यभाविता ॥ भवाब्धिभाग्यसञ्चाराभवाब्धिभाग्यसञ्चिता ॥१६७ ॥ भवाब्धि भाग्यसुपथाभवाब्धिभाग्यसुप्रदा ॥ भवाब्धिभाग्यरीतिज्ञाभवा ब्धिभाग्यनीतिदा ॥१६८॥भवाब्धिभाग्यरीत्येशीभवाब्धिभाग्य रीतिनी॥भवाब्धिभोगनिपुणाभवाब्धिभोगसम्प्रदा॥१६९॥भवा ब्धिभाग्यगहनाभवाब्धिभोग्यगुम्फिता।भवाब्धिभोगगान्धारीभ वाब्धिभोगगुम्फिता॥१७०॥ भवाब्धिभोगसुरसाभवाब्धिभोगसु स्पृहा ॥ भवाब्धिभोगग्रथिनीभवाब्धिभोगयोगिनी ॥ १७१ ॥ भवाब्धिभोगरसनाभवाब्धिभोगराजिता ॥ भवाब्धिभोगविभ वाभवाब्धिभोगविस्तृता ॥ १७२ ॥ भवाब्धिभोगवरदाभवाब्धि भोगवन्दिता ॥ भवाब्धिभोगकुशलाभवाब्धिभोगशोभिता ॥ ॥१७३॥ भवाब्धिभेदजननीभवाब्धिभेदपालिनी ॥ भवाब्धिभे दरचनाभवाब्धिभेदरक्षिता ॥ १७४ ॥ भवाब्धिभेदनियताभवा

ब्धिभेदनिस्पृहा॥भवाब्धिभेदरचनाभवाब्धिभेदरोपिता॥१७५॥ भवाब्धिभेदराशिघ्नीभवाब्धिभेदराशिनी ॥ भवाब्धिभेदकर्म्मेशी भवाब्धिभेदकर्म्मिणी ॥ १७६ ॥ भद्रेशीभद्रजननीभद्राभद्रनिवासिनी ॥ भद्रेश्वरीभद्रवतीभद्रस्थाभद्रदायिनी ॥ १७७ ॥ भद्ररूपाभद्रमयीभद्रदाभद्रभाषिणी ॥ भद्रकर्ण्णाभद्रवेशाभद्राम्बाभद्रमन्दिरा ॥ १७८ ॥ भद्रक्रियाभद्रकलाभद्रिकाभद्रवर्द्धिनी ॥ भद्रक्रीडाभद्रकलाभद्रलीलाभिलाषिणी ॥ १७९ ॥ भद्राङ्कराभद्रतामद्राङ्क्षीभद्रमन्त्रिणी ॥ भद्रविद्याभद्रविद्याभद्रवाग्भद्रवादिनी ॥ १८० ॥ भूपमङ्गलदाभूपामूलताभूमिवाहिनी ॥ भूपभोगाभूपशोभाभूपाशाभूपरूपदा ॥ १८१ ॥ भूपाकृतिर्भ्भूपरतिर्भ्भूपश्रीर्भ्भूपश्रेयसी ॥ भूपनीतिर्भ्भूपरीतिर्भ्भूपभीतिर्भ्भयङ्करी ॥१८२॥ भवदानन्दलहरीभवदानन्दसुन्दरी ॥ भवदानन्दकरणीभवदानन्दवर्द्धिनी ॥ १८३ ॥ भवदानन्दरमणीभवदानन्ददायिनी ॥ भवदानन्दजननीभवदानन्दरूपिणी ॥ १८४ ॥ यइदम्पठतेस्तोत्रम्प्रत्यहम्भक्तिसँय्युतः ॥ गुरुभक्तियुतोभूत्वागुरुसेवापरायणः ॥ १८५ ॥ सत्यवादीजितेन्द्रीचताम्बूलपूरिताननः ॥ दिवारात्रौचसन्ध्यायांसभवेत्परमेश्वरः ॥ १८६ ॥ स्तवमात्रस्य पाठेनराजावश्योभवेद्ध्रुवम् ॥ सर्व्वागमेषुविज्ञानीसर्व्वतन्त्रेस्वयंहरः ॥ १८७ ॥ गुरोर्म्मुखात्समभ्यस्य स्थित्वाचगुरुसन्निधौ ॥ शिवस्थानेषुसन्ध्यायांशून्यागारेचतुष्पथे ॥ १८८ ॥ यश्पठेच्छृणुयाद्वापिसयोगीनात्रसंशयः ॥ सर्व्वस्वन्दक्षिणान्दद्यात्स्त्रीपुत्रादिकमेवच ॥ १८९ ॥ स्वच्छन्दमानसोभूत्वास्तवमेतत्समुद्धरेत् ॥ एतत्स्तोत्रस्तोदेविहररूपोनसंशयः ॥ १९० ॥ यश्पठेच्छृणुयाद्वापिएकचित्तेनसर्व्वदा ॥ सदीर्घायुःसुखीवाग्मीवाणीतस्यनसंशयः ॥ १९१ ॥ गुरुपादरतोभूत्वाकामिनीनाम्भव

त्प्रियः॥धनवान्गुणवान्श्रीमान्धीमानिवगुरुःप्रिये ॥१९२॥ सर्व्वेषान्तुप्रियोभूत्वापूजयेत्सर्व्वदास्तवम् ॥ मन्त्रसिद्धिःकरस्थैव तस्यदेविनसंशयः ॥ १९३ ॥ कुवेरत्वम्भवेत्तस्यतस्याधीनाहि सिद्धयः ॥ मृतपुत्राचयानारीदौर्भाग्यपरिपीडिता ॥ १९४ ॥ वन्ध्यावाकाकवन्ध्यावामृतवत्साचयाङ्गना ॥ धनधान्यविहीनाचरोगशोकाकुलाचया॥१९५॥ताभिरेतन्महादेविभूर्ज्जपत्रेविलेखयेत्॥सव्येभुजेचबध्नीयात्सर्व्वसौख्यवतीभवेत्॥ १९६॥ एवम्पुनःपुनःप्रायाद्गुःखेनपरिपीडिता ॥ सभायांव्यसनैर्व्वाणीविवादेशत्रुसङ्कटे ॥ १९७॥ चतुरङ्गेतथायुद्धेसर्व्वत्रापदिपीडिते ॥ स्मरणादस्यकल्याणिसंशयंयात्यदूरतः ॥ १९८ ॥ नदेयम्परशिष्यायनाभक्तायचदुर्म्मने ॥ दाम्भिकायकुशीलायकृपणायसुरेश्वरि ॥ १९९ ॥ दद्याच्छिष्यायशान्तायविनीतायजितात्मने॥ भक्तायशान्तियुक्तायजपपूजारतायच ॥ २०० ॥ जन्मान्तरसहस्रैस्तुवर्ण्णितुन्नैवशक्यते ॥ स्तवमात्रस्यमाहात्म्यञ्चक्रकोटिशतैरपि ॥ २०१ ॥ विष्णवेकथितम्पूर्व्वंब्रह्मणापिप्रियञ्चदे ॥ अधुनापितवस्नेहात्कथितम्परमेश्वरि ॥ २०२ ॥ गोपितव्यम्पशुभ्यश्चसर्व्वथानप्रकाशयेत् ॥२०३॥ इतिश्रीमहातन्त्रार्ण्णवेईश्वरपार्व्वतीसंवादे भुवनेश्वरीभकारादिसहस्रनामस्तोत्रंसमाप्तम् ॥

इति शाक्तप्रमोदे भुवनेश्वरीतन्त्रं समाप्तम् ।

खेमराज श्रीकृष्णदास "श्रीवेङ्कटेश्वर" (स्टीम्) प्रेस–बम्बई.